# ॥ शिवाष्टोत्तरशतदिव्यस्थानीयनामस्तोत्रम् ॥

अष्टोत्तरशतं भूमौ स्थितं क्षेत्रं वदाम्यहम्।
कैवल्यशैले श्रीकण्ठः केदारो हिमवत्यपि ॥ १ ॥

काशीपुर्यां विश्वनाथः श्रीशैले मल्लिकार्जुनः।
प्रयागे नीलकण्ठेशो गयायां रुद्रनामकः ॥ २ ॥

नीलकण्ठेश्वरः साक्षात् कालञ्जरपुरे शिवः।
द्राक्षारामे तु भीमेशो मायूरे चाम्बिकेश्वरः ॥ ३ ॥

ब्रह्मावर्ते देवलिङ्गः प्रभासे शशिभूषणः।
वृषध्वजाभिधः श्रीमतिः श्वेतहस्तिपुरेश्वरः ॥ ४ ॥

गोकर्णेशस्तु गोकर्णे सोमेशः सोमनाथके।
श्रीरूपाख्ये त्यागराजो वेदे वेदपुरीश्वरः ॥ ५ ॥

भीमारामे तु भीमेशो मन्थने कालिकेश्वरः।
मधुरायां चोक्कनाथो मानसे माधवेश्वरः ॥ ६ ॥

श्रीवाञ्छके चम्पकेशः पञ्चवट्यां वटेश्वरः।
गजारण्ये तु वैद्येशस्तीर्थाद्रौ तीर्थकेश्वरः ॥ ७ ॥

कुम्भकोणे तु कुम्भेशो लेपाक्ष्यां पापनाशनः।
कण्वपुर्यां तु कण्वेशो मध्ये मध्यार्जुनेश्वरः ॥ ८ ॥

हरिहरपुरे श्रीशङ्करनारायणेश्वरः।
विरिञ्चिपुर्यां मार्गेशः पञ्चनद्यां गिरीश्वरः ॥ ९ ॥

पम्पापुर्यां विरूपाक्षः सोमाद्रौ मल्लिकार्जुनः।
त्रिमकूटे त्वगस्त्येशः सुब्रह्मण्येऽहिपेश्वरः ॥ १० ॥

महाबलेश्वरः साक्षान्महाबलशिलोच्चये।
रविणा पूजितो दक्षिणावर्तेऽर्केश्वरः स्वयम् ॥ ११ ॥

वेदारण्ये महापुण्ये वेदारण्येश्वराभिधः।
मूर्तित्रयात्मकः सोमपुर्यां सोमेश्वराभिधः ॥ १२ ॥

अवन्त्यां रामलिङ्गेशः काश्मीरे विजयेश्वरः।
महानन्दिपुरे साक्षान्महानन्दिपुरेश्वरः ॥ १३ ॥

कोटितीर्थे तु कोटीशो वृद्धे वृद्धाचलेश्वरः।
महापुण्ये तत्र ककुद्गिरौ गङ्गाधरेश्वरः॥ १४॥

चामराज्याख्यनगरे चामराजेश्वरः स्वयम्।
नन्दीश्वरो नन्दिगिरौ चण्डेशो बधिराचले॥ १५॥

नञ्जुण्डेशो गरपुरे शतशृङ्गे।
घनानन्दाचले सोमो नल्लूरे विमलेश्वरः॥ १६॥

नीडानाथपुरे साक्षान्नीडानाथेश्वरः स्वयम्।
एकान्ते रामलिङ्गेशः श्रीनागे कुण्डलीश्वरः॥ १७॥

श्रीकन्यायां त्रिभङ्गीश उत्सङ्गे राघवेश्वरः।
मत्स्यतीर्थे तु तीर्थेशस्त्रिकूटे ताण्डवेश्वरः॥ १८॥

प्रसन्नाख्यपुरे मार्गसहायेशो वरप्रदः।
गण्डक्यां शिवनाभस्तु श्रीपतौ श्रीपतीश्वरः॥ १९॥

धर्मपुर्यां धर्मलिङ्गः कन्याकुब्जे कलाधरः।
वाणिग्रामे विरिञ्चेशो नेपाले नकुलेश्वरः॥ २०॥

मार्कण्डेयो जगन्नाथे स्वयम्भूर्नर्मदातटे।
धर्मस्थले मञ्जुनाथो व्यासेशस्तु त्रिरूपके॥ २१॥

स्वर्णावत्यां कलिङ्गेशो निर्मले पन्नगेश्वरः।
पुण्डरीके जैमिनीशोऽयोध्यायां मधुरेश्वरः॥ २२॥

सिद्धवट्यां तु सिद्धेशः श्रीकूर्मे त्रिपुरान्तकः।
मणिकुण्डलतीर्थे तु मणिमुक्तानदीश्वरः॥ २३॥

वटाटव्यां कृत्तिवासास्त्रिवेण्यां सङ्गमेश्वरः।
स्तनिताख्ये तु मल्लेश इन्द्रकीलेऽर्जुनेश्वरः॥ २४॥

शेषाद्रौ कपिलेशस्तु पुष्पे पुष्पगिरीश्वरः।
भुवनेशश्चित्रकूटे तूज्जिन्यां कालिकेश्वरः॥ २५॥

ज्वालामुख्यां शूलटङ्को मङ्गल्यां सङ्गमेश्वरः।
बृहतीशस्तञ्जापुर्यां रामेशो वह्निपुष्करे॥ २६॥

लङ्काद्वीपे तु मत्स्येशः कूर्मेशो गन्धमादने।
विन्ध्याचले वराहेशो नृसिंहः स्यादहोबिले॥ २७॥

कुरुक्षेत्रे वामनेशस्ततः कपिलतीर्थके।
तथा परशुरामेशः सेतौ रामेश्वराभिधः॥२८॥

साकेते बलरामेशो बौद्धेशो वारणावते।
तत्त्वक्षेत्रे च कल्कीशः कृष्णेशः स्यान्महेन्द्रके॥२९॥

॥इति ललितागमे ज्ञानपादे शिवलिङ्गप्रादुर्भावपटलान्तर्गते श्रीशिवाष्टोत्तरशतदिव्यस्थानीयनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Shiva_Ashtottara_Shatadivyasthaniya_Nama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits